

चतुर्दश अध्यायः

# लयसाम्यम्

भारते पारम्परिकानां नृत्यानां समृद्धा परम्परा वर्तते। सेयं परम्परा विश्वस्य प्रत्येकं देशस्य विविधाभिः सांस्कृतिकपरम्पराभिः सह गभीरतया सम्बद्धास्ति। एतानि नृत्यरूपाणि न केवलं चलनानाम् संहतरूपाणि सन्ति, अपि तु कथानां, भावानाम्, आध्यात्मिकतायाश्च अभिव्यञ्जनान्यपि सन्ति।

पारम्परिकं नृत्यं तु *शास्त्रीयं नृत्यं लोकनृत्यं* वा भवितुम् अर्हति। किन्तु तत् प्रत्येकं नृत्यरूपम् अन्योन्यविलक्षणम् अस्ति, यदेव हि अस्माकं संस्कृतेः विविधतायाः मूलम् अस्ति।

अस्माकं समीपे अनेकानि वाद्ययन्त्राणि, उपकरणानि, वेषभूषाः, भाषाः, लोकश्रुतश्च सन्ति। भिन्नानां गोष्ठीनां नृत्येषु तेषां प्रयोगः द्रष्टुं शक्यन्ते। एतादृशानि पारम्परिकानि नृत्यरूपाणि अस्माकं राष्ट्रस्य गौरवभूतानि भवन्ति तथा तेन माध्यमेनैव अस्माकं सामाजिक-नैतिक-अखण्डता च सुदृढा भवति।

साम्प्रतम् अस्माकं नृत्यस्य अस्याः समृद्धायाः सांस्कृतिक-परम्परायाः रक्षणं संरक्षणं च भवतामेव उत्तरदायित्वम् अस्ति।

0680CH14

## क्रियाकलापः १

## अस्माकं पारस्मरिकाः नृत्यकलाः

स्वस्य प्रदेशस्य पारम्परिकनृत्यस्य किञ्चन रूपं, तत्सम्बद्धम् गीतं च चिनोतु। तस्मिन् प्रयुक्तैः वाद्यैः सह लयबद्धनृत्यं करोतु।



*बिहू*

© NCERT not to be republished



*गुजरातस्य सिडि-धामल नामकं लोकनृत्यम्*

**उदाहरणम् १ :** असमराज्यस्य बिहूनामके उत्सवे ढोलवाद्यस्य, पेपानामकस्य महिषशृङ्गेण निर्मितस्य एकस्य अनन्यस्य पवनयन्त्रस्य उपयोगो भवति।

**उदाहरणम् २ :** सिडि-धमाल नामकं नृत्यं गुजरातप्रान्ते प्रसिद्धम्। अस्य प्रदर्शनकाले बृहन्तः ढोलकाः वाद्यरूपेण उपयुज्यन्ते।

किं भवन्तः/भवत्यः प्रदर्शनाय सज्जाः सन्ति? कांश्चन क्षणान् प्रतीक्ष्यताम्। किं भवन्तः/भवत्यः चर्चाम् अकुर्वन् यत् स्वेषां नृत्येषु कानि कानि सहायकोपकरणानि (यथा - घटः, यष्टिः, वलयः ... इत्यादीनि) उपयोक्ष्यन्ते?

किं भवतीभिः इदं विचारितं यत् भवत्यः/भवन्तः यत् नृत्यं प्रस्तोतुं सज्जाः सन्ति, तस्य नृत्यस्य विशिष्टा वेशभूषा का अस्ति इति?

भारतस्य सर्वाः नृत्यकलाः अस्माकं सांस्कृतिके ऐतिह्ये आधारिताः सन्ति। नृत्ये न केवलं गतिः, लयः, संगीतमेव आगच्छति, अपि तु वेषभूषा, सहायकानि उपकरणानि, सज्जीकरणम्, मञ्चस्थानम् इत्यादीन्यपि अन्तर्भवन्ति।

## क्रियाकलापः २
## नृत्यालङ्काराणां सहायकोपकरणानाञ्च निर्माणम्

कस्यचिद् विशिष्टस्य नृत्यस्य कृते आवश्यकानां वेशभूषाणां विषये सहनर्तकैः सह आलोचयन्तु। नृत्योपकरणानां निर्माणाय सामान्येन उपलब्धानि वस्तूनि व्यवहरन्तु, यथा - दृढफलकम्, वर्णिताः कागदाः, अलङ्कृताः पट्टिकाः इत्यादीनि।

**उदाहरणम् :** नृत्यस्य आभूषणानि यथा हारः, शिरस्त्राणम्, हनुमानस्य मुखाकृतिः, राज्ञ्याः मुकुटः चेत्यादीनि।



*कर्णकुण्डली*



*हारः*



*शिरस्त्राणम्*



*नूपुरः*

© NCERT not to be republished

क्रियाकलापः ३

## स्वस्य इच्छानुसारं किमप्येकम् आभरणम् उपकरणं वा चित्रयतु

© NCERT not to be republished

कागदं, कार्डबोर्ड, वस्त्रम् इत्यादीनां उपयोगेन तानि निर्मातुं प्रयतन्ताम्।



जालैः सह नर्तनम्



सङ्गीतोपस्थापनाय समाविष्टाः सङ्गीतज्ञाः

## क्रियाकलापः ४

## प्रदर्शनस्थलस्य ज्ञानम्

कक्षायाम् अधोलिखितेषु विषयेषु चर्चयन्तु -

- प्रदर्शनं विचलितं न कृत्वा मञ्चे आवश्यकानाम् उपकरणानां स्थापनम्।
- नृत्याय याः वेषभूषाः परिधाने सौकर्यं जनयन्ति (हस्तपादयोः उत्थापनम्, कूदनम्, मोडनम् इत्यादयः) तानि परिधानानि सज्जीकुर्वन्तु।
- मञ्चस्य द्वयोः पार्श्वयोः प्रवेशः निर्गमः च। (नाट्यखण्डे मञ्चसंरचनां पश्यन्तु।)

विभिन्नेषु नृत्येषु भिन्नानि उपकरणानि अपेक्षन्ते, तथा च मञ्चस्यापि भिन्नरूपेण अलङ्करणमपि आवश्यकम्। आशास्ति यत् नृत्यस्य प्रत्येकं तत्त्वं सर्वेषां कृते स्पष्टम् अस्ति इति।

अधुना यावत् भवन्तः/भवत्यः लघुषु समूहेषु कार्यम् अकुर्वन्। अग्रे गत्वा भवन्तः/भवत्यः वर्गस्य सर्वेषां सदस्यानां सामूहिकसमूहरूपेण कार्यं करिष्यन्ति।

अधुना, भवती नूतनं वस्तु अन्वेष्टुं गच्छति!

## नृत्यनाट्यम्

वयं न केवलं 'नृत्यम्' इति शब्दस्य विषये अवगताः स्मः, अपि तु 'नाटकम्' अपि अवगताः स्मः।

यदि वयं नृत्यं नाटकं च एकत्र संयोजयामः, तर्हि कार्यं करिष्यामो वा?

नृत्यनाटकं नाट्यं वा सृजनात्मकस्य व्यञ्जनस्य एकः प्रकारः अस्ति, यत्र प्रतिभागिनः नृत्यस्य उपयोगस्य कथां कथयितुम्, सन्देशं प्रसारयितुं वा सोपानम्, शरीरम्, हस्तमुद्रां च उपयुज्य प्रायः गीतसङ्गीतयोः अभिनयं कुर्वन्ति।



© NCERT not to be republished

नृत्यनाटकस्य आवश्यकता अस्ति - समन्वयः, अभिव्यक्तिः, कलाकारानां मध्ये समन्वयश्च।

**समन्वयः**



**अभिव्यक्तिः**



**कलाकारानां मध्ये समन्वयः**



नृत्यनाटके गत्यभिनयकलानां समन्वयेन एकम् आख्यानं प्रदर्श्यते। नृत्यनाटकाः विविधैः विषयैः संस्कृतिभिर्वा ऐतिहासिकाभिः घटनाभिः प्रेरिताः भवितुम् अर्हन्ति, येन कलान्वेषणाय विविधः समृद्धः मञ्चः प्राप्येत।

## क्रियाकलापः ५
## प्रकृत्याः एका कथा

तथा एकां कथाम् अन्विषन्तु, आलोचयन्तु च या हि प्रकृत्या पर्यावरणेन वा सह सम्बद्धास्ति, अथवा भारतस्य स्वातन्त्र्यतायाः संग्रामेन सह सम्बद्धास्ति, यया अस्माकं समाजस्य नैतिकः उपदेशः प्राप्येत।

**उदाहरणानि** -

तादृश्यः कथाः याः सम्बद्धाः सन्ति -

- प्लास्टिकोपयोगस्य परिहारविषये
- जलस्थानकस्य रक्षणविषये
- चलद्दूरभाषस्य अतिव्यवहारविषये
- जैविक-कृषि-विषये
- शिक्षायां समानतायाः विषये

**द्रष्टव्यः** - आङ्गलभाषायाः अन्यभाषायार्वा पाठ्यपुस्तकात् एकां कथां चिन्वन्तु।

तथा एकां युक्तां कथां चिन्वन्तु, कक्षायां च उपस्थापयन्तु, या कथा भवतां/भवतीनां परिसरेण प्रान्तेन वा सह सम्बद्धास्ति।

संलापः (स्क्रिप्ट्) इत्येकस्य लिखितस्य तथ्यस्य नाम वर्तते यत्र उद्धृतयः, गीतानि, क्रियाः, प्रदर्शनाय निर्देशाः, नृत्य-नाट्य-अभिनयादीनाम् उपस्थापनाय अपेक्षिताः प्रदर्शिन्यश्च शब्दमुखेन हस्तमुद्राभिः लिखिताः।

चिन्तयतु ...

चर्चयन्तु ...

लिखन्तु ...

चयनितायाः कथायाः काव्यस्य वा कृते संलापं लिखित्वा परस्परं विचारान् विचिन्त्य *नाट्यं* निर्मातुं प्रयतन्ताम्।

संलापस्य लेखनकाले तादृशीनाम् उद्धृतीनां विषये चिन्तयन्तु यत्र *हस्तमुद्रा* व्यवहृता, पात्राणि उपयुक्तानि, वेशभूषाः, उपकरणानि, मञ्चश्च व्यवहृताः।

अस्मिन् कार्ये भवन्तः/भवत्यः कथायाः सर्वेषु पात्रेषु जीवनं दास्यन्ति।

नाट्यस्य उपस्थापनाय *हस्तमुद्रायाः*, हस्तयोः शरीरस्य च सञ्चालनस्य अभ्यासं कुर्वन्तु।

तालस्य, पदस्य, गत्याः, *हस्तमुद्रायाः*, मुद्रायाश्च तत्त्वानि काव्ये संकलय्य अभ्यसन्तु।

अपि च, नाट्ये यानि नृत्यानि समाविष्टानि सन्ति, तेषां बोल्-द्वारा *चाल्लुकूट्टुस्*-द्वारा वा लयात्मकं निबन्धनं (यथा - *था क धि मि इति*), किञ्च *सरगमं* (प्रायशः सङ्गीतवर्गे शिक्षितम्) च जानन्तु।

मुखस्य भावान् अभ्यसन्तु यद्धि नाट्यस्य मुख्यं तत्त्वमस्ति। नाट्यस्य व्यवस्थिततया परिणामप्राप्तये भवतां समेषां सहभागः अत्यन्तम् अपेक्षितः।



क्रियाकलापः ६

## नृत्यलेखनं नाट्योपस्थापनं च

एकत्र आगत्य एकस्य नाट्यस्य नृत्यनिर्देशनं कुर्वन्तु यस्मिन् संवादाः, लयात्मकसङ्गीतं, नृत्यस्पन्दनानि, एकसमूहरूपेण कार्यं कृत्वा गतिः च सन्ति।



नृत्यनिर्देशस्य अस्मिन् चरणे अस्माभिः सहोपकरणानि, वेषभूषाः, आभूषणम्, मञ्चसज्जा इत्यादयो विषयाः अवलोकनीयाः।

सहोपकरणैः सह अभ्यासन्तु, पूर्वम् उपस्थापनं कुर्वन्तो भवन्तः तान् सुखेन सञ्चालयितुं शक्नुवन्ति।

नृत्यलेखनं समाप्तं चेद् अधुना अभ्यासः करणीयः।

अभ्यासः! अभ्यासः! पुनः पुनः अभ्यासः!

अभ्यासो हि साफल्यस्य प्रमुखं सोपानम्...

नाट्यस्य अभ्यासानन्तरं कालोऽयं मञ्चोपस्थापनाय अभ्यासकरणस्य।

बहु शोभनम्!

स्ववर्गस्य समीपे, सर्वसाधरणानां दर्शकानां समीपे वा स्वस्य नाट्यम् उपस्थापयन्तु।